# श्री सुरसरस्वती सभा शृङ्गेरि

## तुरीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः – २९-८-२०१० अङ्काः–१००

पूर्वाह्ने - १०-०० तः १-०० पर्यन्तम् समयः–घण्टात्रयम्

**1 पञ्चानां एकवाक्येन उत्तरं लिखत ।** 5

१. कस्यौषधं नास्ति ?
२. हिमालयः क इव अस्ति ?
३. समृद्धयः कथं निवसन्ति ?
४. अलका नाम केषां वसतिः ?
५. मातङ्गः स्वपूर्ववृत्तान्तं कस्मै अकथयत् ?
६. अर्जुनः कथं पुनर्नवो बभूव ?
७. बकासुरहनने कस्य प्रथमं भयमागतम् ?
८. केशवदासो नाम ब्राह्मणः कुत्र किमर्थं प्रस्थितः ?

**2 पञ्चानां द्वित्रैः वाक्यैः उत्तरं लिखत ।** 10

१. कम् अर्चामः कान् निहन्मः ?
२. द्वितीयः ब्राह्मणपुत्रः किमर्थं 'धन्योऽस्मि' इति कथयति ?
३. कन्यका स्वमातरं किमाह ?
४. भीष्मस्य आशयं कः कथमपूरयत् ?
५. राजवाहनः विन्ध्याटवीमध्ये कीदृशं पुरुषं ददर्श ?
६. यक्षः कुत्र वसतिं चक्रे ? कस्मिन् दिवसे सः प्रेक्षणीयं ददर्श ?
७. कीदृशं नृपं प्रजाः प्रणमन्ति ?

**3 द्वयोः पञ्चैः वाक्यैः उत्तरं लिखत ।** 8

१. भीष्मः कृष्णं किमाबभाषे ?
२. गौरीपतिः मातङ्गं स्वप्ने किमवदत् ?



पश्चादनुवर्तते

३. कः ब्राह्मणजनं वित्रासयति ? सः कीदृशः ?

४. विप्रकुटुम्बस्य सम्भूतापत् का ? तस्याः निवारणं कथमभवत् ।

**4 वाक्यत्रयं सप्रसङ्गं विवृणुत ।** 9

१. नाब्धिः क्षुभ्यति न प्रसीदति ततो न क्षीयते नैधते ।

२. पूज्यतमाः खलु ब्राह्मणाः ।

३. वधाय कल्पितश्छागः पर्णं भक्षयितुमिच्छति ।

४. संस्कारानुरूपं हि सर्वं चेष्टितम् ।

५. संप्रति महान्नयनोत्सवो जातः ।

**5 द्वयोः भावं विशदयत ।** 8

१. कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छाया तरुषु वसतिं रामगिर्याश्रमेषु ।।

२. मतिमान् विनयप्रमाथिनः
समुपेक्षेत समुन्नतिं द्विषः ।
सुजयः खलु तादृगन्तरे
विपदन्ता ह्यविनीत सम्पदः ।।

३. अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः ।।

**6 श्लोकद्वयं पूर्णं लिखत ।** 6

१) विपदि ............................................... ।
............................................. महात्मनाम् ।।

२) प्रथमवयसि ..........................................

..........................................विस्मरन्ति ।।

7 एकस्य कवेः देशकालग्रन्थान् अधिकृत्य लिखत । 4

१) दण्डी २) नीलकण्ठदीक्षितः ३) भासः

8 एकस्य लघुटिप्पणीं लिखत । 4

१) कुन्ती २) घटोत्कचः

9 चत्वारि पदानि वाक्ये योजयत । 4

१) पर्यायक्रमेण २) सन्निहितः ३) उपेत्य
४) अस्मि ५) बहुधा ६) मात्रा

10 चतुर्णां रूपाणि विवेचयत । 4

१) गिरम् २) अद्रौ ३) हन्मि
४) अटन्ती ५) व्रजसि ६) अपसर

11 चतुर्णां पर्यायपदानि लिखत । 4

१) आयोधनम् २) यामिनी ३) गीर्वाणपतिः
४) प्रत्यूहः ५) अब्धिः ६) जगच्चक्षुः

12 चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत । 4

१) भूतबलिः २) कुसुमकोमलम् ३) षडङ्गम्
४) मृगपक्षिणः ५) हतशत्रुः ६) आमुक्ति

13 चतुर्णां सन्धिं विभज्य नाम लिखत । 4

१) अम्बुमुचस्तपन्तु २) खल्वेषः ३. तावदेनम्
४) चिन्मयः ५) यदैव ६) शुभैर्गुणैः



पश्चादनुवर्तते

14 द्वयोः व्याकरणविशेषं लिखत । 4

१) पाञ्चालराजः २) अलं परिश्रमेण ३) वैराटिः

15 समासमेकं सलक्षणं विशदयत । 4

१) कर्मधारयः २) उपपद समासः

16 इतरवचनरूपाणि लिखत । 4

१) सुखाय ............... ................ ।
२) ................ ................ शरीरिणाम् ।
३) ................ ................ द्विषः ।
४) श्वा ................ ................ ।

17 रिक्तस्थानानि पूरयत । 4

१) किं किं न साधयति ............... विद्या ।
२) ननु पापाः न हन्तव्यो ............... ।
३) भारतयुद्धं ............... धृतराष्ट्राय व्याचख्यौ ।
४) न खलु एकचक्रो ............... याति ।

18 चतुर्थं पदं लिखत । 4

| | | | | |
|---|---|---|---|---|
| १) कुमारसम्भवम् | ; कालिदासः | – | किरातार्जुनीयम् | ............... |
| २) दैन्यम् | ; अदैन्यम् | – | मत्सरः | ................ |
| ३) गिरिवनजलपुष्पैः | ; द्वन्द्वः | – | नागेन्द्रः | ................ |
| ४) वैकर्तनः | ; कर्णः | – | वार्ष्णेयः | ................ |

19 द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत । 6

१) अवोचत् २) पिनष्टु ३) जागर्ति
४) गम्यताम् ५) सेविष्यते ६) चक्रे

* * * * *